
प्रथमः पाठः



# १ अहं नमामि



अहं नमामि मातरम्
गुरुं नमामि सादरम् ॥१॥

स्वयं पठामि सर्वदा
प्रियं वदामि सर्वदा ॥२॥

हितं करोमि सर्वदा
शुभं करोमि सर्वदा ॥३॥

हरिं नमामि सादरम्
गुरुं नमामि सादरम् ॥४॥

चलामि नीति-सत्पथे
हरामि मातृभू-व्यथाम् ॥५॥

दधामि साधुताव्रतम्
सृजामि कीर्तिसत्कथाम् ॥६॥

प्रभुं जपामि सादरम्
अहं नमामि मातरम् ॥७॥

© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अहम् | अहम् | मैं | I | |
| नमामि | प्रणमामि | नमन करता हूँ | I Bow / I Salute | |
| मातरम् | अम्बाम् | माता को | To the mother | |
| सादरम् | आदरसहितम् | आदर के साथ | Respectfully | |
| वदामि | कथयामि | बोलता हूँ/ बोलती हूँ | I Speak | |
| सर्वदा | सदा | सदैव | Always | |
| जपामि | जपं करोमि | जप करता हूँ/ करती हूँ | I Chant | |
| नीति-सत्पथे | नीतियुक्तसत्यमार्गे | नीति के सच्चे रास्ते पर | On the path of ethics and truth | |
| हरामि | दूरं करोमि | हरण करता हूँ/ करती हूँ | I take away | |
| मातृभू-व्यथाम् | मातृभूमेः पीडाम् | मातृभूमि की व्यथा को | The pain of the motherland | |
| दधामि | धरामि | धारण करता हूँ/ करती हूँ | I hold | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| साधुताव्रतम् | सज्जनताव्रतम् | सज्जनता के व्रत को | The vow of goodness | |
| सृजामि | सर्जनं करोमि | रचना करता हूँ/ करती हूँ | I Create | |
| कीर्तिसत्कथाम् | सुगाथाम् | यश की सच्ची कहानी को | The true story of glory | |
| चलामि | गच्छामि | चलता हूँ /चलती हूँ | I walk | |
| प्रभुम् | ईश्वरम् | प्रभु को | To God | |
| गुरुम् | शिक्षकम् | गुरु को | To teacher | |
| स्वयम् | आत्मा | अपने आप | Self | |
| पठामि | पठनं करोमि | पढ़ता हूँ/ पढ़ती हूँ | I read | |
| प्रियम् | मनोहारि | प्रिय | Pleasant | |

## अत्र इदम् अवधेयम्

पुरुषाः त्रयः भवन्ति— प्रथमपुरुषः मध्यमपुरुषः उत्तमपुरुषः च।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमपुरुषः** | सः नमति | तौ नमतः | ते नमन्ति |
| **मध्यमपुरुषः** | त्वं नमसि | युवां नमथः | यूयं नमथ |
| **उत्तमपुरुषः** | अहं नमामि | आवां नमावः | वयं नमामः |

प्रथमपुरुष— एकवचने सः / सा / भवान् / भवती / कोऽपि पदार्थः (पुं., स्त्री., नपु.) इत्यादयः कर्तारो भवन्ति। तदनुसारेण तस्य (द्वि. व., बहु. व.) अपि भवति।

**अस्मिन् पाठे लट् लकारे उत्तमपुरुषस्य एकवचनस्य प्रयोगः अस्ति।**

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

**१. कविताया: निम्नलिखितासु पङ्क्तिषु रिक्तस्थानानि पूरयत—**

**यथा—** हरामि मातृभू-व्यथाम्।

क. गुरुं...................... सादरम्।

ख. हितं करोमि .................... ।

ग. .............. नीति-सत्पथे।

घ. दधामि .............................व्रतम्।

ङ. ................... कीर्तिसत्कथाम्।

**२. एकशब्देन उत्तरं लिखत—**

**यथा—प्रश्नः** अहं कां नमामि?

**उत्तरम्** मातरम्

क. किं करोमि सर्वदा?

ख. अहं प्रभुं कथं जपामि?

ग. अहं कां हरामि?

घ. अहं किं दधामि?

ङ. अहं कां सृजामि?

**३. प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत—**

**यथा—प्रश्नः** त्वं किं दधासि?

**उत्तरम्** अहं साधुताव्रतम् दधामि।

क. त्वं नित्यं कां नमसि?

ख. त्वं स्वयं किं किं करोषि?

ग. त्वं कस्याः व्यथां हरसि?

घ. त्वं किं धरसि?

ङ. त्वं कां सृजसि?

© NCERT not to be republished



## क्रियाकलापः

**१. रिक्तस्थानानि पूरयित्वा वाक्यानि रचयत—**

यथा— अहं चित्रं सृजामि।

क. वयं ............... .................।

ख. ......... ................ वदामि।

ग. अहं ................ ..................।

घ. ........... ................ चलामः।

ङ. त्वं ................ ..................।

**२. एतैः क्रियापदैः वाक्यानि रचयत।**

नमामि चलामि

पठामि सृजामि

जपामि करोमि

**३. शिक्षकेण बालकैः सह सस्वरगानाय प्रयासः करणीयः।**

© NCERT not to be republished

